# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-6)** **प्रश्नपत्रम् – 5** गुणाः –70

विषयः – पुराणेतिहासः **कोड –C. C.3.6.11** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –03/04/2019 सन्दर्भग्रन्थः – श्रीमद्भागवते नवमस्कन्धः, मा.पु.७९ तः ९१ अध्यायाः

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 अधोलिखितश्लोकेषु कयोश्चित् द्वयोः प्रसङ्गसन्दर्भान्वयपूर्वकं भावार्थो लेख्यः। 10**

(1) पितर्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमाम्।
शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः॥

(2) कोऽपि धारियता वेगं पतन्त्या मे महीतले।
अन्यथा भूतलं भित्वा नृप यास्ये रसातलम्॥

(3) अन्तर्वन्त्यागते काले यमौ सा सुषुवे सुतौ।
कुशो लव इति ख्यातौ तपोश्चक्रे क्रिया मुनिः॥

**प्रश्नः-2 कस्याप्येकस्योत्तरं सविस्तरं लिख्यताम्। 10**

(1) अम्बरीषचरितं यथाग्रन्थं वर्णयन्तु।

(2) यथाग्रन्थं रामचरितं वर्णयन्तु।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 अधोलिखितश्लोकेषु कयोश्चित् द्वयोः सन्दर्भप्रसङ्गान्वयपूर्वकं भावार्थो लेख्यः। 10**

(1) क्षमया रोचते लक्ष्मीर्ब्राह्मी गौरी यथा प्रभा।
क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः॥

(2) यत् पृथिव्यां व्रीहियवं, हिरण्यं पशवः स्त्रियः।
न दुह्यन्ति मनः प्रीतिं पुंसः कामहतस्य ते॥

(3) न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥

**प्रश्नः-4 कस्याप्येकस्योत्तरं सविस्तरं लिख्यताम्। 10**

(1) परशुरामचरितं ग्रन्थानुसारं लिख्यताम्।

(2) देवयानी – ययातिचरितं सम्यक् लिखन्तु।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 अधोलिखितश्लोकेषु कयोश्चित् द्वयोः सन्दर्भप्रसङ्गान्वयपूर्वकं भावार्थो लेख्यः।** **10**

(1) अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम् ।
हिमवान् वाहनं सिंहं रत्नानि विविधानि च ॥

(2) वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ।
निःश्वासपवनेनान्यान् पातयामास भूतले ॥

(3) माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ।
दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ॥

**प्रश्नः-6 कस्याप्येकस्योत्तरं सविस्तरं यथाग्रन्थं लिख्यताम्।** **10**

(1) शक्रादिकृता देवी स्तुतिः लिख्यताम् ।

(2) दुर्गासप्तशतीपाठस्य फलं विस्तारेण वर्णयन्तु ।

### अन्वितयः १-३

**प्रश्नः-7 अधोलिखितेषु दशप्रश्नानामुत्तराणि एकद्विवाक्येन लिखन्तु ।** **10**

(1) नवमस्कन्धे का लीला? कति चाध्यायाः?

(2) श्राद्धदेवमनोः कति पुत्राः?

(3) सुकन्यायाः तातस्य नाम किम्?

(4) अम्बरीषगृहे कः ऋषिः समागतः?

(5) गङ्गा भूतले केन आनीता?

(6) दशरथस्य कति पुत्राः? के च ते?

(7) परशुरामस्य मातुर्नाम किमासीत्?

(8) नहुषस्य कति पुत्राः? के च ते?

(9) शर्मिष्ठायाः पितुर्नाम किमासीत्?

(10) बृहस्पतियुगस्य नाम किमासीत्?

(11) सप्तशत्यां पूर्णश्लोकाः कति सन्ति?

(12) वैश्यस्य नाम किमासीत्?

(13) कति चरित्राणि? चरित्रे किं किं समायाति?

(14) कस्मिन् अध्याये कति अवदानानि सन्ति?

(15) कलियुगे कयोः प्रधानता अस्ति?